SL. No. : FF

ಒಟ್ಟು ಪ್ರಶ್ನೆಗಳ ಸಂಖ್ಯೆ : 46 ]
Total No. of Questions : 46 ]

**CCE RF REVISED**

[ ಒಟ್ಟು ಮುದ್ರಿತ ಪುಟಗಳ ಸಂಖ್ಯೆ : 8
[ Total No. of Printed Pages : 8

ಸಂಕೇತ ಸಂಖ್ಯೆ : **67-S** | **Code No. : 67-S**

# ವಿಷಯ : ತೃತೀಯ ಭಾಷೆ — ಸಂಸ್ಕೃತ

# Subject : Third Language — SANSKRIT

# तृतीय भाषा — संस्कृतम्

**( ಹೊಸ ಪಠ್ಯಕ್ರಮ / New Syllabus )**
**( ಶಾಲಾ ಅಭ್ಯರ್ಥಿ / Regular Fresh )**

ದಿನಾಂಕ : 04. 04. 2018 ] | [ Date : 04. 04. 2018
ಸಮಯ : ಬೆಳಿಗ್ಗೆ 9-30 ರಿಂದ ಮಧ್ಯಾಹ–12-00 ರವರೆಗೆ ] | [ Time : 9-30 A.M. to 12-00 Noon
ಗರಿಷ್ಠ ಅಂಕಗಳು : 80 ] | [ Max. Marks : 80

***ಪರೀಕ್ಷಾರ್ಥಿಗಾಗಿ ಸಾಮಾನ್ಯ ಸೂಚನೆಗಳು :***

1. ಈ ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯು 46 ವಸ್ತುನಿಷ್ಠ ಮತ್ತು ವಿಷಯನಿಷ್ಠ ಮಾದರಿಯ ಪ್ರಶ್ನೆಗಳನ್ನು ಹೊಂದಿದೆ.
2. ಈ ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯನ್ನು ಹಿಮ್ಮುಖ ಜಾಕೆಟ್ ಮೂಲಕ ಮೊಹರು (ಸೀಲ್) ಮಾಡಲಾಗಿದೆ. ಪರೀಕ್ಷೆ ಪ್ರಾರಂಭವಾಗುವ ಸಮಯಕ್ಕೆ ನಿಮ್ಮ ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯ ಬಲಬದಿ ಪಾರ್ಶ್ವವನ್ನು ಕತ್ತರಿಸಿ, ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯಲ್ಲಿ ಎಲ್ಲಾ ಪುಟಗಳು ಇವೆಯೇ ಎಂದು ಪರೀಕ್ಷಿಸಿಕೊಳ್ಳಿ.
3. ವಸ್ತುನಿಷ್ಠ ಮತ್ತು ವಿಷಯನಿಷ್ಠ ಮಾದರಿಯ ಪ್ರಶ್ನೆಗಳಿಗೆ ಕೊಟ್ಟಿರುವ ಸೂಚನೆಗಳನ್ನು ಪಾಲಿಸಿ.
4. ಬಲ ಭಾಗದಲ್ಲಿ ಕೊಟ್ಟಿರುವ ಅಂಕಿಗಳು ಪ್ರಶ್ನೆಗಳಿಗಿರುವ ಪೂರ್ಣ ಅಂಕಗಳನ್ನು ತೋರಿಸುತ್ತವೆ.
5. ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯನ್ನು ಓದಿಕೊಳ್ಳಲು 15 ನಿಮಿಷಗಳ ಕಾಲಾವಕಾಶವು ಸೇರಿದಂತೆ, ಉತ್ತರಿಸಲು ನಿಗದಿಪಡಿಸಲಾದ ಸಮಯವನ್ನು ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯ ಮೇಲ್ಭಾಗದಲ್ಲಿ ಕೊಡಲಾಗಿದೆ.

***छात्रं प्रति सामान्यनियमाः***

1. अस्मिन् प्रश्नपत्रे षट्चत्वारिंशत् (46) वस्तुनिष्ठाः व्यक्तिनिष्ठाश्च प्रश्नाः सन्ति ।
2. इदं प्रश्नपत्रं विपरीतेन आवरणेन मुद्रिताङ्कमस्ति । परीक्षासमये प्रश्नपत्रमुद्घाटयितुं दक्षिणपार्श्वेन कर्तय । प्रश्नपत्रस्य पृष्ठानि पूर्णानि सन्ति इति पर्यालोचय ।
3. व्यक्तिनिष्ठानां वस्तुनिष्ठानाञ्च प्रश्नानां विषये निर्दिष्टाः नियमाः अनुपालनीयाः ।
4. प्रश्नानां प्रति अधिकतयाः अङ्काः पार्श्वे लिखिताः सन्ति ।
5. प्रश्नपत्रमुत्तरयितुं निर्धारिता समयावधिः प्रश्नपत्रस्य उपरि भागे लिखितः अस्ति । यस्मिन् पञ्चदशपलानि प्रश्नपत्रस्य पठनार्थं निर्धारितानि सन्ति ।

इतः कर्तय

TEAR HERE TO OPEN THE QUESTION PAPER
प्रश्नपत्रमुद्घाटयितुमितः कर्तय

Tear here

## भागः - A

### ( गद्यम्-पद्यम्-पूरकपाठाः )

I. एकवाक्येन उत्तरं लिखत — 10 × 1 = 10

1. विवेकानन्दस्य शिष्यः कः ?
2. विश्वसंस्कृत पुस्तकमेलायां बहुजनाकृष्टं स्थानं किम् ?
3. मेलुकोटे कस्मिन् मण्डले अस्ति ?
4. पठनार्थं का आवश्यकी ?
5. लोकपाली कः भवति ?
6. केन सदृशं पवित्रं नास्ति ?
7. ग्रन्थपालः कां दृष्ट्वा आश्चर्यचकितः जातः ?
8. कः इन्दुः क्षीरनिधाविव प्रसूतः ?
9. अस्माकं का एका एव ?
10. के शैशवे अभ्यस्तविद्याः आसन् ?

II. संयोज्य लिखत — 4 × 1 = 4

| *अ* | *आ* |
|---|---|
| 11. अङ्गराजः | a) रावणः |
| 12. दशकण्ठः | b) दक्षिणामूर्तिः |
| 13. अशनम् | c) कर्णः |
| 14. गुरुः | d) आहारः |
| | e) जानकी |
| | f) सूर्यः । |

III. **द्वि-त्रैः** वाक्यैः संस्कृतभाषया उत्तरं लिखत – $2 \times 2 = 4$

15. कीदृशः महाबलः वः पातु ?

16. रघुवंशीयाः राजानः कथम् आसन् ?

**अथवा**

कर्मणः विषये भगवतः अभिप्रायः कः ?

IV. श्लोकतात्पर्यं कन्नडभाषया आङ्ग्लभाषया वा लिखत – $2 \times 2 = 4$

17. कर्मण्येवाधिकारस्ते मा फलेषु कदाचन ।
मा कर्मफलहेतुर्भूः मा ते सङ्गोऽस्त्वकर्मणि ।।

18. भाषा भिन्ना वेषो भिन्नः
नीतिर्भिन्ना नियमो भिन्नः ।
भिन्ना जातिः भिन्नञ्च कुलम्
भिन्नावेव हि मतधर्मौ ।।

**अथवा**

हिमालयो नः पूज्यः शैलः
पूज्यनदी सा गङ्गाम्बा ।
साहित्यं नः सङ्गीतमपि
भाषा भेदेऽप्येकमिह ।।

V. संस्कृतभाषया अनुवादं कुरुत – 2

19. ಪಕ್ಷಿಗಳು ಗೂಡಿನಲ್ಲಿ ವಾಸಿಸುತ್ತವೆ. ಅವು ಆಕಾಶದಲ್ಲಿ ಹಾರುತ್ತವೆ.

कर्नाटकभाषया अनुवादं कुरुत – 2

20. शिवपार्वत्योः पुत्रः गणेशः । कार्यारम्भे सर्वे गणेशं पूजयन्ति ।

VI. कवेः देश-काल-ग्रन्थानां विषये लिखत – 3

21. "भोजराजः"

**अथवा**

"कालिदासः" ।

VII. यथानिर्देशम् उत्तरं लिखत – 2 × 3 = 6

22. ''भवान् कर्णाय साधुवादं यच्छति''

क: पाठः ? कः अवदत् ? कम् अवदत् ?

23. ''सागर इव तिष्ठतु ते यशः''

क: पाठः ? कः अवदत् ? कम् अवदत् ?

VIII. कर्णाटकभाषया, आङ्ग्लभाषया, संस्कृतभाषया वा उत्तरं लिखत – 3 × 3 = 9

24. संस्कृत ग्रामस्य वैशिष्ट्यं वर्णयत ।

25. मेलुकोटे क्षेत्रम् अधिकृत्य लिखत ।

26. विक्रमवेतालयोः कथां सङ्गृह्य लिखत ।

**अथवा**

भारतस्य आदर्शनारी ''उभयभारती'' इति विषयं सङ्गृह्य लिखत ।

IX. श्लोकं पूरयत – 1 × 4 = 4

27. मनसि वचसि ..............................................................................

..............................................................................................।

..............................................................................................

.............................................................................. सन्तः कियन्तः ॥

**अथवा**

शिक्षा क्षयं ..............................................................................

..............................................................................................।

..............................................................................................

.............................................................................. तथैव तिष्ठति ॥

## भागः - B

### ( व्याकरणविभागः )

X. अधोलिखितप्रश्नेभ्यः चत्वारः विकल्पाः प्रदत्ताः । तेषु समुचितं विकल्पं चित्वा क्रमाक्षरेण सह उत्तरपत्रिकायां लिखत । 12 × 1 = 12

28. 'सन्तोषः' अस्य समानार्थकपदम् एवम् अस्ति –

(A) आनन्दः (B) दुःखम्

(C) खेदः (D) असुखम् ।

29. 'देवः' इत्यस्य विरुद्धार्थकपदम् इदम् अस्ति –

(A) मनुष्यः (B) दानवः

(C) जन्तुः (D) गन्धर्वः ।

30. "अपृच्छत्" इत्यत्र एषः लकारः भवति –

(A) लट् लकारः (B) लङ् लकारः

(C) लृट् लकारः (D) लोट् लकारः ।

31. "कौन्तेयः" इत्यत्र एतद् वचनं भवति –

(A) एकवचनम् (B) द्विवचनम्

(C) बहुवचनम् (D) बसवेश्वरवचनम् ।

32. 'तमोघ्नाय' इत्यत्र एषा विभक्तिः भवति –

(A) चतुर्थी विभक्तिः (B) पञ्चमी विभक्तिः

(C) षष्ठी विभक्तिः (D) सप्तमी विभक्तिः ।

33. "भगवद्गीता, कृष्णः, अर्जुनः, वाल्मीकिः" अत्र समूहेतरं पदम् इदं भवति –

(A) भगवद्गीता (B) कृष्णः

(C) अर्जुनः (D) वाल्मीकिः ।

34. ''मैत्रेयः + इच्छति'' इत्यत्र एषः सन्धिः भवति –

(A) जश्त्वसन्धिः (B) विसर्गसन्धिः

(C) गुणसन्धिः (D) सवर्णदीर्घसन्धिः ।

35. ''मुरारिरपि'' इत्यत्र विसर्गस्य एषः आदेशः भवति –

(A) सकारादेशः (B) उकारादेशः

(C) रकारादेशः (D) लोपः ।

36. ''अन्यपदार्थप्रधानः'' अयं समासः भवति –

(A) द्वन्द्वः (B) तत्पुरुषः

(C) अव्ययीभावः (D) बहुव्रीहिः ।

37. ''पुत्राय जनकः धनं ददाति'' इति वाक्ये जनकः इति शब्दः अस्मिन् कारके अस्ति –

(A) कर्मकारके (B) करणकारके

(C) कर्तृकारके (D) अपादानकारके ।

38. ''विघ्नानाम् अभावः'' इत्यत्र समस्तपदम् एवं भवति –

(A) नितरां विघ्नः (B) विघ्नम्

(C) विज्ञानम् (D) निर्विघ्नम् ।

39. ''चतुर्थी विभक्तिः'' अस्मिन् कारके अस्ति –

(A) कर्तृकारके (B) अपादानकारके

(C) सम्प्रदानकारके (D) अधिकरणकारके ।

XI. कृदन्तपदं चित्वा लिखत – $2 \times 1 = 2$

40. i) बालकेन पाठः पठितव्यः ।

ii) देवी विराजमाना अस्ति ।

अत्र चतुर्थपदं लिखत – $2 \times 1 = 2$

41. i) अस्माकम् अयम् – अस्मदीयः :: भवताम् अयम् – ........................ ।

ii) तेन प्रकारेण – तथा :: येन प्रकारेण – ............................ ।

## भागः - C

### ( रचनाविभागः )

XII. लक्षणं विलिख्य अलङ्कारस्य नाम लिखत – 2

42. ''मुखारविन्दम्''

XIII. प्रस्तारं विलिख्य गणविभागं कृत्वा छन्दसः नाम लिखत – 2

43. ''निजहृदि विलसन्तः सन्ति सन्तः कियन्तः ।''

XIV. पत्रं लिखत – 4

44. दिनद्वयस्य विरामं सम्प्रार्थ्य कक्ष्योपाध्यायं प्रति पत्रं लिखत ।

**अथवा**

प्रवासार्थं धनं प्रेषयितुं सम्प्रार्थ्य पितरं प्रति पत्रं लिखत ।

XV. प्रबन्धं लिखत – 4

45. परिसरसंरक्षणम् ।।

**अथवा**

सङ्गणकयन्त्रम् ।।

XVI. गद्यभागं पठित्वा प्रश्नानाम् उत्तरं लिखत – $4 \times 1 = 4$

46. कस्मिंश्चिद् ग्रामे बहुकालपर्यन्तं अनावृष्टिः आसीत् । भूमिः शुष्का जाता । पेयजलस्य अपि अभावः जातः । तदा जनाः दैवज्ञस्य समीपं गत्वा पृष्टवन्तः । तदा सः त्रीणि वर्षाणि वृष्टिः न भविष्यति इति उक्तवान् । तत् श्रुत्वा ग्रामवासिनः सर्वे जीवनार्थं बहुदूरं गतवन्तः । सः ग्रामः एव निर्जनः जातः ।

i) बहुकालपर्यन्तं कुत्र अनावृष्टिः आसीत् ?

ii) कस्य अभावः जातः ?

iii) जनाः कस्य समीपं गत्वा पृष्टवन्तः ?

iv) दैवज्ञः कति वर्षाणि वृष्टिः न भविष्यति इति उक्तवान् ?